बालैक विंशतिः

मधुर शास्त्री

मूल लेखक
जयप्रकाश भारती



समर्पितेयं कृतिका
प्रीतये
संस्कृत-विदुषे
डॉ. रमाकान्तशुक्लाय
सादरम्

बालैक विंशतिः

इक्कीस सचित्र बाल कहानियाँ

[हैंस ऐंडरसन सम्मान प्राप्त प्रथम भारतीय पुस्तक]

संस्कृत अकादमी, दिल्ली के सौजन्य से

संस्करण
प्रथम, 1992
मूल्य
बारह रुपये मात्र
प्रकाशक
शारदा प्रकाशन
16/एफ-3, अंसारी रोड, दरिया गंज, नई दिल्ली-110002
मुद्रक
कम्प्यूटर कोड्स द्वारा
ताज प्रेस, मायापुरी, नई दिल्ली

बालैक विंशतिः

जयप्रकाश भारती
अनुवादक
मधुर शास्त्री

प्रकाशक
शारदा प्रकाशन, अंसारी रोड, दरियागंज
नई दिल्ली-110002

छोटी-सी बात

संस्कृत-साहित्य की अगाधता, सौन्दर्य और विपुलता में तों कोई संदेह है ही नहीं परन्तु पंचतंत्र एवं हितोपदेश आदि के अतिरिक्त बाल-साहित्य का अभाव ही है। मेरी इच्छा थी कि संस्कृत में कुछ बालोपयोगी साहित्य की रचना भी हो। इन्हीं दिनों प्रियमित्र एवं बाल-साहित्य के यशस्वी लेखक श्री जयप्रकाश भारती की हिन्दी बाल-कथाओं का संग्रह "हैंस ऐंडरसन" सम्मान से सम्मानित हुआ। बाल-साहित्य की यह पहली भारतीय पुस्तक थी जिसे यह आदर मिला। मेरा मन हुआ कि संस्कृत-परिवार के बालकों और बालिकाओं के लिए सरल संस्कृत में पुरस्कृत पुस्तक "हीरों का हार" की इक्कीस कहानियों का अनुवाद करूँ। इन कहानियों को पढ़ने से संस्कृत-अध्ययन में रुचि बढ़े यह उद्देश्य रहा। इन कथाओं में उपदेशक वृत्ति नहीं है फिर भी जीवन का संदेश है। बालमन को प्रभावित करने की शक्ति इनमें है।

हमारा आधुनिक समाज ऐसी कहानियों से व्यक्ति और परिवार को सुसंस्कृत करे तो एक संस्कारवान् समाज का निर्माण हो। आज की सामाजिक दुर्गति का कारण ही सांस्कृतिक अभिरुचि का अभाव है। इसमें सहज बोलचाल की शैली अपनाई गई है। व्याकरण से क्षमा मांगकर बाल-पाठक को यह सुविधा दी है कि वह संधि और समास के कारण किसी अर्थ को समझने में असमर्थ न हो। संस्कृत से अनभिज्ञ भी वाक्य पढ़कर अर्थ समझ सके, यह प्रयत्न रहा है। जो बालक इन्हें पढ़कर भाषा और अर्थ का ज्ञान करे उसे मेरे हार्दिक आशीर्वाद। बालः विश्वस्यजीवनम्।

जयप्रकाश भारती की कहानियों का अनेक भाषाओं में अनुवाद हुआ है। संस्कृत भाषा की यह प्रथम अनूदित पुस्तक है। संस्कृत अकादमी के सचिव श्री कृष्ण सेमवाल जी के प्रति आभार व्यक्त करता हूँ। उनकी संस्कृत-साहित्य-विस्तार योजना महत्वपूर्ण है। इस प्रयास को प्राथमिकता देकर उन्होंने अपना संस्कृत-स्नेह प्रक्ट किया है। विद्वद्वर्ग त्रुटि को उदारतापूर्वक क्षमा करेंगे। इसके सुरुचिपूर्ण प्रकाशन के लिए शारदा प्रकाशन साधुवाद के पात्र है। उनके सत्प्रयत्न से ही यह पुस्तक आकृति ले सकी।


--मधुर शास्त्री

ज्ञात्वा लिख

श्री व्यासः महामुनेः पराशरस्य पुत्रः आसीत्। महामुनिः एवं महाकविः श्री व्यासः एव महाभारतम् नाम महाकाव्यम् अरचयत्। अस्मात् सुन्दरतरः ग्रन्थः अन्यः नास्ति। ज्ञानस्य, विज्ञानस्य जीवनस्य च शिक्षायै एषः अतुलनीयः ग्रन्थः अस्ति।

महर्षेः व्यासस्य मनसि महाभारतस्य कथा अंकिता आसीत् परन्तु संसारस्य कृते इयम् कथा कथम् उपयुक्ता भवेत् इति विचार्य सः चिन्तितः अभवत्। सः ब्रह्माणम् अस्मरत्। स्मरणमात्रेण ब्रह्मा उपस्थितः। श्री व्यासः प्रथमम् प्रणम्य ततः हस्तौ संयुज्य न्यवेदयत्-भगवन्, अहम् एकम् महान्तम् ग्रंथम् रचयितुम् इच्छामि परन्तु कः तम् ग्रंथम् लिपिबद्धम् कर्त्तुम् शक्नुयात् ? श्री व्यासस्य वचनम् श्रुत्वा प्रसन्नः ब्रह्मा प्रत्यवदत्-यत् श्री गणेशः इदम् कार्यम् कर्तुम् शक्नोति, अतः स एव ध्यातव्यः। इदम् कथयित्वा ब्रह्मा गतवान्।

महामुनिः व्यासः श्री गणेशस्य ध्यानम् अकरोत्। श्री गणेशः तत्र समुपस्थितः। व्यासः पूजया तम् प्रसन्नं कृत्वा प्रार्थयत् यत् सः एकस्य महतः


Sen

ग्रन्थस्य रचनायै श्री गणेशस्य सहयोगम् इच्छति इति। अतः भगवान् श्री गणेशः तम् लिपिबद्धं कर्तुम् उद्यतः भवतु कृपया।

श्रीगणेशः उदतरत् - हे महामुने, अहम् ग्रंथम् लिपिबद्धं कर्तुम् उद्यतः अस्मि परन्तु श्लोक-रचनायाम् विरामः न भवेत्। यदि रचनायाम् विरामः भवति तदा मम लेखनी पुनर्लेखनम् न करिष्यति।

महाकविः व्यासः इदं स्वीकृत्य श्री गणेशम् अकथयत् भगवन्, भवान् अपि पूर्वम् श्लोकानाम् अर्थान् सर्वथा ज्ञात्वा एव लिखतु। इदम् श्रुत्वा श्रीगणेशः हसित्वा प्रत्यवदत् - अस्तु एवमेव भविष्यति इति।

तदनन्तरम् व्यासः श्रीगणेशः च परस्परम् समुन्मुखौ अभवताम्। मुनिः व्यासः यथा यथा श्लोकानाम् रचनाम् कृतवान् श्री गणेशः श्रुत्वा विज्ञाय च तान् श्लोकान् लिपिबद्धान् अकरोत्। इदं द्रष्ट्वा कविः व्यासः कांश्चित् क्लिष्टान् श्लोकान् अरचयत् येषाम् अर्थज्ञाने श्रीगणेशः किंचित् क्षणम् विरमते, तस्मिन्नेव समयावधौ व्यासः अन्यान् श्लोकान् रचयति स्म।

अनेन प्रकारेण महाभारतस्य रचना अभवत्। श्री व्यासः श्लोक रचनाम् करोति श्री गणेशः तान् लिपिबद्धान् करोतिस्म। श्री व्यासस्य इयम् उक्तिः साभिप्राया यत्-यत् किंचित् लेखनीयम् तद् पूर्वम् ज्ञात्वा एव लेखनीयम्। अन्धानुकरणम् न कर्त्तव्यम्। जीवने समस्तानि कार्याणि ज्ञात्वा एव कुर्यात्।

समाधानम्

विक्षिप्तानाम् मनुष्याणाम् एकः ग्रामः आसीत्। तस्य ग्रामस्य अनेकाः कथाः प्रसिद्धाः आसन्। एकदा रात्रौ एकः गजः ग्राममार्गेण अगच्छत्। प्रातः ग्रामवासिनः मार्गे गजस्य पदचिह्नानि अपश्यन्। वृहदाकाराणि चिह्नानि आसन्। ग्रामीणाः गजस्य विषये अनभिज्ञाः आसन्। ते अचिन्तयन् किमत्र कश्चित् राक्षसः इतः आगतवान् ? केचित् जनाः मिलित्वा लाल बुझक्कड़स्य पार्श्वे गताः। ते लालबुझक्कड़म् बृहत्पदचिह्नानि प्रादर्शयन्। तत्क्षणादेव पदचिह्नस्य समस्या पूर्णा।

लाल बुझक्कड़म् कुर्यात् प्रश्नम् , नान्यम् कदापि वै।

पदैः बद्ध्वा च पाषाणम् मृगाः कूर्दन - संगताः।

सर्वे ग्राम वासिनः सर्वसम्मत्या स्वीकृतवन्तः यत् मृगः एव अनेन मार्गेण गतः भवेत्।

हे बालाः, यूयम् अपि केनचित् विक्षिप्तेन आतंकिताः। वयम् सर्वे विक्षिप्तान् जानीमः। विक्षिप्तैः सह सर्वेषाम् परिचयः। मूर्खाणाम् संसारः विचित्रः। मूर्खाणाम् एकः ग्रामः, तत्र वसन्तः मूर्खाः अतिशयोक्तीः कुर्वन्तः

आसन्। एकस्मिन् दिने तेषु चर्चा अभवत्। ते परस्परम् अपृच्छन् - चन्द्रसूर्ययोः कः महत्तरः अस्ति ? कश्चित् अपि उत्तरितुम् न अशक्नोत्। तदा ग्रामप्रधानम् अपृच्छन्। ग्राम-प्रधानः किंचित् शिरः स्पर्शं कृत्वा विचार मुद्रया उपनेत्राभ्याम् द्रष्ट्वा अवदत् - रे लोकाः, नायम् कठिन-प्रश्नः । एतयोः द्वयोः चन्द्र-सूर्ययोः चन्द्र एव श्रेष्ठः । चन्द्रः रात्रौ दीव्यति, अंधकार-नाशाय तस्य उपयोगिता अस्ति, परन्तु सूर्यः तु दिने उदितः भवति, दिने तस्य आवश्यकता नास्ति चन्द्रस्य ।

उत्तरं श्रुत्वा ग्रामवासिनः प्रसन्नाः भूत्वा साधुवादम् अकथयन्। कियत् सुन्दरम् उत्तरम् अस्ति ?

सदा प्रसन्नमना भव

पुरा खुरासान - नाम्नः स्थानस्य राजपुत्रः युद्धाय गतवान्। पाथेय रूपेण भोजन-पानानि सुख-साधनानि त्रिंशत् उष्ट्रेषु संचितानि आसन्।

युद्धे सः पराजितः अभवत्। श्रेष्ठः इस्माइलः तम् राजकुमारं वन्दिनम् अकरोत्। बुभुक्षा वन्दिनम् अपि बाधते। राजपुत्रः पाचकम् अकथयत् - भ्रातः किंचित् भोजनाय आनय। यद्यपि पाचकस्य पार्श्वे पर्याप्तम् साधनम्

अवशिष्टम् न आसीत् तथापि येन केन प्रकारेण सः मृत्तिका - भांडे किंचित् पाचयितुम् अयतत। स्वयम् शाकादेः अन्वेषणाय बहिः अगच्छत्।

एतस्मिन्नन्तरे एकः कुक्कुरः तत्र आगच्छत्। सः अवसरम् लब्ध्वा मृत्तिका - पात्रे मुखं कृतवान्। पात्रम् लघुमुखम् आसीत् अतः तस्य कुक्कुरस्य ग्रीवा पर्यन्तम् शिरः तस्मिन् पात्रे अवरुद्धम् अभवत्। चिन्तितः भूत्वा सः इतस्ततः धावितुम् आरभत। राजपुत्रः तम् द्रष्ट्वा अहसत्। गुरुराजेन इस्माइलेन नियुक्तः कश्चित् अधिकारी प्रहरी तत्र आसीत्। हसन्तम् राजकुमारं दृष्ट्वा सः आश्चर्यचकितः अभवत्। सः अवदत् - श्रीमन् भवान् अस्मिन् विपत्काले अपि हसन् अस्ति। राजकुमारः प्रत्यवदत् - आम्, एवमेव अस्ति। प्रातः येम्यः वस्तुम्यः त्रिशतानाम् उष्ट्राणाम् आवश्यकता आसीत् तेम्यः अधुना एकः कुक्कुरः एव पर्याप्तम्।

प्रत्येकस्यां परिस्थितौ प्रसन्नतायाः अन्वेषणम् जीवन-सुखस्य मूलम्। जीवने सफलता असफलता च द्वे एव स्तः। वयम् केन-प्रकारेण कार्यम् कुर्मः - एतदेव विचारणीयम्, केवलम् सफलता एव नहि विचारणीया। मानसिंहः दिल्ली नगर्याः राजसिंहासन सामीप्यम् लब्ध्वा अपि नहि प्रतापात् महत्तरः। प्रताप एव महान् वीरः। एकः मनुष्यः लघु कुटीरे शान्तिम् सुखम् च अनुभवति, अन्यः द्वितीयः राजभवने अपि अशान्तः दुःखम् अनुभवति। अतः यः यथाकालम् संतुष्टः सः एव प्रसन्नः।

त्रिपादगामी

पुरातने समये 'थेवीस' नाम्नि नगरे एकः पर्वतः आसीत्। शैलशिखरे एका विचित्रा राक्षसी निवसति स्म। तस्याः शिरः नारीवत् , शरीरम् सिंहवत् , पुच्छेन सर्पवत् वृहत्-पक्षि सदृशम् पक्षद्वयम् च। पर्वतस्य निकटे एकः मार्गः आसीत्। सा राक्षसी नगरम् प्रति गच्छन्तम् प्रत्येकम् पथिकम् प्रहेलिकाम् पृच्छति स्म। प्रहेलिका आसीत् - एतादृशः कः जीवः यः प्रातः काले चतुर्भिः पादैः, मध्याहे द्वाभ्याम् पादाभ्याम् , तथा सायं काले त्रिभिः पादैः चलति ?

अनेके पथिकाः तां दृष्ट्वा एव विस्मय-विस्मृताः प्रहेलिकाम् उत्तरितुम् अशक्ताः तस्याः राक्षस्याः भोजनभूताः परलोकं प्रयान्ति स्म। एवम् अनेके मनुष्याः हताः।

एकस्मिन् दिने एकः चतुरः यूनानी पथिकः तत्र आगच्छत्। सः श्मश्रुवान् वृद्धः दंडाश्रयेण चलति स्म। तेन वृद्धेन सह तस्यपुत्रः तथा बालकः पौत्रः आसीत्। राक्षसी तान् दृष्ट्वा प्रसन्ना अभवत्। भोजनलुब्धा सा वृद्धम् अवरुध्य प्रहेलिकाम् अपृच्छत्। वृद्धः कंपमानेन शिरसा किंचित् विचार्य उदतरत् - अहम् एव सः जीवः। अहम् मनुष्यः मम पौत्रः जानुभ्याम्



हस्ताभ्याम् च चलति, मम पुत्रः द्वाभ्याम् पादाभ्याम् चलति तथ अहम् स्वयम् जीवनस्य संध्यायाम् द्वाभ्याम् पादाभ्याम् , दंडेन च चलामि।

इदम् उत्तरं श्रुत्वा सा राक्षसी विस्मय-मुग्धा संजाता। सा क्रोधेन द्वौ पक्षौ प्रकंपितौ कृतवती। तदैव तस्याः पक्षद्वयम् नष्टम् तथा सा अपि मृत्युम् अलभत।

मूर्खः महान् जातः

'मिलान' नाम्नि नगरे एकः बालकः आलः वसति स्म। सः मासत्रयम् यावत् विद्यालयम् अगच्छत्। एकस्मिन् दिने यदा सः विद्यालयात् प्रत्यागच्छत् तदा अत्यन्तम् रुष्टः अभवत्। सः मातरम् अपृच्छत् - मातः कः मूर्खः कथ्यते? तस्य माता नैनसी इलियटं बालकं पश्यन्ती प्रत्युदतरत् - यः बुद्धिहीनः सः मूर्खः भवति। तदा बालकः अपृच्छत् - तदा अहम् एतादृशः मूर्खः अस्मि यत् मम अध्यापकः माम् मूर्खम् कथयित्वा सदा निन्दति।
माता अकथयत् - पुत्रक, नैतदुचितम्, त्वम् मूर्खः नासि। बालकः रुदितः परिलक्षितः अभवत्। माता बालकम् सर्वम् वृत्तान्तम् अपृच्छत्।
अन्यस्मिन् दिने माता श्रीमती नैनसी पुत्रम् अकथयत् - पुत्र, विवाहात् पूर्वम् अहम 'वियना' नगरे एकस्मिन् विद्यालये अध्यापिका आसम्। अतः यदि अहम्

गृहे एव त्वाम् पाठयामि तदा प्रसन्नः भविष्यसि। इति श्रुत्वा बालः आलः अतीव संतुष्टः अभवत्। सः मातरम् अपृच्छत् - मातः, अहम् यत् किमपि ज्ञातुम् इच्छामि तत् सर्वम् किम् मया ज्ञातुम् शक्यते ? माता प्रत्यवदत् - पुत्र, योग्यः अध्यापकः इदमेव वांछति यत् तस्य शिष्यः बहून् प्रश्नान् पृच्छेत्।

आलस्य पूर्णम् नाम थॉमस अल्वा एडीसन इति आसीत्। विद्यालये केवलम् मासत्रय पर्यन्तम् शिक्षाम् अलभत। अनन्तरं सः संसारे महान् आविष्कारकः प्रसिद्धः अभवत्। तेन विद्युद्दीपकाः, ग्रामोफोन यंत्रम् चलचित्रयंत्रम् उदघोषित्रम् च इत्यादीनि वस्तूनि आविष्कृतानि। एषः महान् वैज्ञानिकः मातुः सम्बन्धे उक्तवान् यत् मम माता एव आश्रयदात्री शिक्षिका याम् विना अहम् अकिंचनः आसम्। एषा महिमा मातुः। मातुः कृपया सः मूर्खः पश्चात् महान् आविष्कारकः प्रसिद्धः संसारे अद्य स्मर्यते।

टोला रामस्य नृत्यम्

टोलारामः एकः ग्रामीणः कृषकः आसीत्। बारं बारं कृषि नाशेन तथा भूमिपतिनां भूमेः शुल्क प्रदानार्थम् कथनेन सः दुःखितः गृहम् त्यक्त्वा बहिः अगच्छत्। क्षुधया श्रमेण च व्याकुलः सः एकस्य वृक्षस्य अधः विश्रामाय

अतिष्ठत्। क्षणानन्तरम् सः निद्रामग्नः संजातः। अर्धरात्रौ तस्य नयने उन्मीलिते तदा सः अपश्यत् यत् तस्य संमुखे एव एकः पुरुषः मन्दिरात् अवतरति। तस्य हस्ते एकम् जलपात्रम् आसीत्। सः पुरुषः भूमौ जलपात्रं निधाय परितः एकां रेखाम् आकृष्य अवदत् - सुन्दरम् आस्तरणम् आनयतु, स्वादिष्टम् भोजनम् जलं च आदाय सेविकाः आगच्छेयुः।

तत् क्षणादेव तत्र स्वर्णिमास्तरणम् , चतस्रः सेविकाः स्वर्णरजत पात्रेषु भोजन-पानम् आदाय समुपस्थिताः। सादरम् समर्पितानि तानि वस्तूनि तस्मै। सः कृषकः तु बुभुक्षितः आसीत् अतः तत्सर्वम् गृहीतवान्। तदनन्तरम् सः कुंभम् दृष्ट्वा आज्ञापयत् अधुना सर्वम् लुप्तम् भवतु" ततः सर्वम् लुप्तम् अभवत्। सः नरः तत्कुंभम् वस्त्रे निक्षिप्य चलितवान्। टोलारामः नेत्रे उत्मीलिते कृत्वा शीघ्रमेव तस्य पुरुषस्य पादौ गृहीतवान् उक्तवान् च - हे दयालो, अहम् निर्धनः अस्मि, मयि कृपां करोतु, कुंभेन मम दरिद्रताम् अपि अपहरतु"। सः पुरुषः प्रत्यवदत् - त्वम् धैर्यम् धारय। पूर्वम् अहम् अपि त्वादृशः एव निर्धनः आसम्। यदा अहम् मुमुर्षुः तदैव एकः साधुः, अस्य कुंभस्य प्राप्त्यै विद्याम् अशिक्षत। सप्तदिवस पर्यन्तम् उपवासं कृत्वा मंत्रसाधना कृता मया। मम साधना अद्यैव संपूर्णा तथा तया विद्यया एतत् जलपात्रम् प्राप्तम्। जलपात्रम् आदाय अहम् बहिः आगच्छम् तथा विद्या परीक्षार्थम् भोजनम् इच्छितवान्। अस्य कुंभस्य विचित्रां शक्तिम् त्वम् दृष्टवान् एव। अतः त्वम् अपि कुंभप्राप्त्यै विद्या-साधनम् कुरु अथवा इदम् जलपात्रं गृहीतुम् शक्नोसि - द्वयोः एकं वस्तु ग्राह्यम्।

टोलारामः तत्कुंभस्य कृपया एकम् सुन्दरं रथम् आहूतवान् , रथम् आरुह्य रात्रौ एव गृहम् प्रत्यागच्छत्। तत्र सः कुंभम् पर्याप्तम् धनम् अयाचत। धनेन गृहम् निर्मितवान् तथा तेन गृहे सर्वाणि सुख साधनानि संचितानि। तदा एकस्मिन् दिने सर्वान् बांधवान् भोजनाय निमंत्रितवान्। तदुत्सवे कुंभम् शिरसि


Sen

निधाय नृत्यम् कर्तुम् आरभत। यावत् सः नृत्ये निमग्नः तावदेव पादस्खलनेन कुंभः भूमौ अपतत् शकलीभूतः च। कुंभे नष्टे यत् प्राप्तम् आसीत् तत् लुप्तम्। तत्र समुपस्थिताः बंधुबांधवाः सर्वे टोलारामम् उपहसितवन्तः।

अधुना टोलारामः दुःखितः शिरः ताड्यमानः अचिन्तयत् यत् तेन कुंभप्राप्तेः विद्या कथम् न प्राप्ता। यदि सः विद्याम् जानीयात् तदा पश्चात्तापस्य अवसरः न भवेत्। अतः साधना कर्त्तव्या, साधनां विना पश्चात्तापः एव भवति।

कलाकारस्य मित्रम्

एकः कलाकारः आसीत्। तस्य एकम् मित्रम् आसीत्। मित्रेण सह वनं गच्छत् सः कलाकारः एकस्मिन् स्थाने स्थितवान्। सः मित्रम् अकथयत् यत् इदम् सुन्दरम् स्थानम् अस्ति, अहम् अत्र प्राकृतिकम् दृश्यम् चित्रितं कर्तुम् इच्छामि" इति कथयित्वा सः तूलिकां रंगपात्रं च गृहीत्वा चित्र-निर्माणे संलग्नः अभवत्। तदैव तस्य मित्रं वन्यम् एकम् हिंसकम् पशुम् आगच्छन्तम् आलोक्य भयात् समीपस्थम् वृक्षम् आरूढवान् तम् कलाकार-मित्रं न किंचित् उक्तवान्।

सः वन्यः पशुः ऋक्षः चित्रकलायाम् लीनम् कलाकारम् अपश्यत् यः चित्रे

वृक्षस्थम् मधुगुच्छम् सत्यमिव उल्लिखितम् कुर्वन् आसीत्। सः ऋक्षः कलाकारम् तन्मधु अयाचत। कलाकारः ऋक्षम् विलोक्य भयत्रस्तः संजातः परन्तु ऋक्षः तम् अकथयत् यत् यदि सः मधुदानं करोति तदा ऋक्षः न किंचित् अपकरिष्यति। कलाकारः अवदत् - अहम् मधुगुच्छम् वृक्षे स्थापयामि त्वम् निर्झरम् गत्वा मुखम् प्रक्षाल्य आगच्छ तथा मधुपानं कुरु'।

कलाकारः मधुच्छत्रं निर्माय वृक्षे अवलम्बितवान्। तस्मिन् वृक्षे तस्य मित्रम् आसीत्। ऋक्षः निर्झरात् आगत्य मधु अन्वेष्टुम् अयतत कलाकारः च प्राणरक्षार्थम् तस्मात् स्थानात् दूरम् गतवान्।

श्वेतपुष्पोपहारः

अल्मोड़ा जनपदे पर्वतानाम् मध्ये एकः कुटीरः आसीत्। तस्मिन् कुटीरे एका वृद्धा माता स्वपुत्र्या गौर्या सह वसति स्म। गौरी प्रसन्नवदना चंचल प्रकृतिः च आसीत्। सर्वे जनाः तस्यै स्पृहयन्ति स्म। एकदा गौरी अकस्मात् अत्यन्तम् रुग्णा संजाता। ग्रामस्य तांत्रिकः मंत्रेण रोगनाशम् कर्तुम् अयतत, वैद्यः च औषधम् अयच्छत् परन्तु गौरी अस्वस्था स्वस्था न अभवत्। सा अत्यन्तम् दुर्बला जाता। माता तस्याः पार्श्वे स्थित्वा जपम् कृतवती। गौरी दुर्बलतया मूर्च्छिता इव अभवत्। एकस्मिन् दिने निद्रायाम् एव गौरी चीत्कारेण



अकथयत् - मातः, पश्य, पश्य इमाम् श्वेतवस्त्रावृतां नारीम् , एषा मह्यम् श्वेत पुष्पाणि प्रयच्छति" । माता इतः उतः अपश्यत् तत्र कश्चित् अपि नासीत्। वृद्धा माता रोदितुम् आरब्धा। सा मनसि शंकिता यत् गौरी मृत्युम् प्राप्स्यति।

क्षणानन्तरम् सा कांचित् प्रतिवेशिनीम् गौर्याः समीपे स्थापयित्वा निश्चित्य च वैद्यम् आनेतुम् अगच्छत्। वैद्यः शैल-शिखरे एकस्मिन् शिवालये वसति स्म। संध्याकाले हिमपातः अपि प्रारब्धः परन्तु वृद्धा कृतनिश्चया आसीत्। एतस्मिन्नन्तरे सा वृद्धा एकाम् श्वेतवस्त्र धारिणीम् नारीम् अपश्यत्। तया सह अनेक-बालकाः आसन्। भयभीता वृद्धा वृक्षस्य पृष्ठ भागे निभृता सर्वम् अपश्यत्।

तत्र एका बालिका पादपर्यन्तम् झबला नामकं वस्त्रम् धारयन्ती वस्त्रेण अवरुद्धा भूत्वा अपतत्। तदैव वृद्धा शीघ्रमेव तत्र गत्वा बालिकाम् अरक्षत् तस्याः वस्त्रम् च सुबद्धम् अकरोत्। पृष्ठभागे इदं दृश्यं दृष्ट्वा सा श्वेतवस्त्रा नारी वृद्धायाः समीपम् आगच्छत्। सा हिमशुभ्रम् एकम् श्वेत-पुष्प-स्तवकम् वृद्धायै अयच्छत्। तदनन्तरम् सा नारी तथा बालकाः अपि सर्वे कुत्रचित् पर्वते तिरोहिताः।

वृद्धा ततः समागत्य गृहम् आगच्छत् यत्र वैद्यः गौर्यै औषधम् यच्छन् आसीत्। वृद्धा वैद्यम् सर्वम् वृत्तान्तम् अकथयत्। सर्वं श्रुत्वा वैद्यः अवदत्-मातः, सा वनदेवी आसीत् त्वम् इमानि पुष्पाणि घ्राणाय गौर्यै प्रयच्छ।

पुष्पस्तवकम् गृहीत्वा गौरी प्रसन्ना अभवत्। तया पुष्पाणि घ्रातानि। पुष्पाणाम् सुगन्धेन सा स्वस्था एवं निर्धना वृद्धा धनवती अभवत्।

अन्यदेशस्य सुखम्

महर्षेः विश्वामित्रस्य शतपुत्राः आसन्। अनन्तरम् सः शुनःशेषम् अपि स्वपुत्रम् अकरोत्। सर्वेषु पुत्रेषु शुनःशेषः ज्येष्ठः श्रेष्ठः च आसीत्। इदं दृष्टवा महर्षेः पुत्राः क्रुद्धाः अभवन्। तत्र दलद्वयम् संजातम्। एकस्य दलस्य नेता ऋषिः मधुच्छंदः आसीत् यः ऋषिपुत्रस्य ज्येष्ठत्वं श्रेष्ठत्वं च महत्वपूर्णम् न स्वीकृतवान्। शेषाः पंचाशत् पुत्राः ऋषेः मधुच्छंदसः पुत्रम् जेतारम् निजनेतारम् अकुर्वन्। ते ऋषिम् विश्वामित्रम् दुर्वचनम् अकथयन्। पिता महर्षिः विश्वामित्रः अत्यधिकम् प्रबोधितवान् परन्तु तैः पुत्रैः किंचिदपि न श्रुतम्। ते देशम् त्यक्त्वा जेतारम् च नीत्वा पारसीक देशम् गतवन्तः। तस्य देशस्य राजा तेषाम् ऋषिपुत्राणाम् स्वागतम् कृतवान्। पितरं प्रति अन्यमनस्काः पुत्राः सुखेन निवसन्तः निजगृहम् स्वदेशं च विस्मृतवन्तः।

बहुदिनानन्तरम् पारसीक देशे जनाः भीषणेन अकालेन ग्रस्ताः अभवन्। दुःखितेषु प्रजाजनेषु अपि राजा एवं तस्य परिवारजनाः सुखेन न्यवसन्। इदं दृष्टवा जेतुः मनसि कष्टम् संजातम्। सः कस्यचिदपि सहायतां कर्त्तुम् समर्थः नासीत् यतः सः विदेशे आसीत्। सः पराश्रितः सुखम् न अन्वभवत्। जेता तु सुखान्वेषी आसीत् परन्तु किम् इदमेव सुखम् ?

जेता अचिन्तयत् यत् देशत्यागः महान् अपराधः। सः स्वदेशं प्रतिनिवृत्तः। अनन्तरम् अवशिष्टाः पुत्रा अपि दुःखानि अनुभूतवन्तः। इयम् ऋग्वेद कथा देशभक्तिम् प्रकटयति। सर्वैः देशस्य कृते जीवनम् देशस्य कृते मरणम् स्वीकर्त्तव्यम्।

परीक्षाकालः

प्राचीनकाले भारतवर्षे सम्राट् हर्षः अभवत्। तदा एकः चीनदेशस्य यात्री भारतम् आगच्छत्। सः अति परिचितः यात्री नाम्ना ह्वेनसांगः चतुर्दश वर्षपर्यन्तम् भारत-भ्रमणम् अकरोत्। अत्र सः वहूनि वस्तूनि अपश्यत् शिक्षां च प्राप्तवान्। तेन अनेक-धर्मग्रंथाः संचिताः।

स्वदेशं प्रति गमनसमये सः सम्राजम् हर्षम् स्वानुभूतिम् अवर्णयत्। प्रसन्नः राजा 'राज्यश्री' नाम्नीं तरणीम् ह्वेनसांगाय प्रायच्छत्। महाराजः हर्षः चीनीयात्रिणः सुरक्षायै विंशति-सैनिकान् प्रेषितवान्। महाराजः सैनिकान् आज्ञापयत्-भोः, अस्याम् तरण्याम् भारतीय-संस्कृतेः न्यासीकृताः धर्मग्रंथाः सन्ति। यात्रा अधिकम् अस्ति अतः यात्रिणः तस्य वस्तूनाम् धर्मग्रंथानाम् च सुरक्षा कर्त्तव्या युष्माभिः।

ह्वेनसांगातिरिक्तम् त्रिंशत् जनाः तत्र आसन्। विंशति-सैनिकाः दश

नाविकाः च आसन्। राज्यश्री तरणी सिन्धुतरंगैः क्रीडन्ती अग्रे प्राचलत्। चतुर्दिनानन्तरम् जलप्लावनम् अभवत्। तरणीम् प्रकंपितां दृष्ट्वा मुख्य-नाविकः तारस्वरेण अकथयत्-तरणी भार-रहिता कर्त्तव्या अन्यथा वयं सर्वे मृत्युमुखम् गमिष्यामः। सेना नायकः अवदत्-भो सहगामिनः, अधुना अस्माकम् परीक्षा कालः। स्वधर्मस्य स्वसंस्कृतेः च सुरक्षा कर्त्तव्या अस्माभिः। इदं श्रुत्वा एकैकं कृत्वा विंशति-सैनिकाः समुद्रे अकूर्दन्। तरणी भाररहिता जाता। बाधां बिना सा अग्रे प्राचलत्। प्राणरक्षाम् उपेक्ष्य देशस्य न्यास रक्षकेभ्यः युवा सैनिकेभ्यः ह्वेनसांगः अत्यन्तम् विह्वलः द्रवितः च अभवत्। चीनदेशपर्यन्तम् निरन्तरम् ह्वेनसांगस्य नेत्रे अश्रुपूरिते आस्ताम्।

देशरक्षायै जीवन-दानम् महत्तरम् किन्तु कर्त्तव्यपालनाय देशन्यासरक्षणाय च जीवनदानम् निश्चयम् एव महान् त्यागः।

राम-भरतयोः मिलनम्

लंका विजयानन्तरम् श्रीरामः विभीषणम् अकथयत् - मम भ्राता भरतः मां प्रतीक्षते अतः कंचित् एतादृशम् उपायम् कुरु येन शीघ्रातिशीघ्रम् अयोध्याम् गच्छेयम्'।

विभीषणः अंजलिं बद्ध्वा प्रत्यवदत् - हे रघुनाथ, भवान्



अयोध्या-गमनाय चिन्तां मा करोतु। लंकाराज्ये अतिशीघ्रगामि पुष्पकः नाम विमानः अस्ति। रावणेन कुबेरात् गृहीतः अयम्। तेन विमानेन दिनैकेन भवान् अयोध्याम् प्रापयितुम् शक्नोति। परन्तु कानिचित् दिनानि अत्र स्थित्वा, विश्रामं कृत्वा अयोध्यां गच्छतु - इति मम अनुरोधः।

श्रीरामः अवदत् - विभीषण, भ्राता भरतः चतुर्दश वर्षानन्तरम् क्षणमपि न स्थास्यति सः प्राणान् त्यक्ष्यति। तत्स्वस्य भ्रातुः अवलोकनम् विना मम मनसि न शान्तिः। अतः शीघ्रम् विमानम् आनय।

किंचित् समयानन्तरम् विभीषणेन सूचितम् - भगवन् , अयम् पुष्पक-विमानः समागतः। पुष्पकः हंसाकारसदृशः आसीत। बाह्यात् स्वर्णमयः आभ्यन्तरात् च रजतमयः आसीत्। विमानः पर्याप्तम् प्रोन्नतः तथा विस्तृतः आसीत्। सहस्राधिकम् यात्रिणः तत्र स्थातुम् शक्नुवन्ति स्म तत्र च शयनाय आस्तरणानि, सभा मंडपाः, स्थितये पीठासनानि आसन्। मधुरं मधुरं क्वणन्त्यः घंटिकाः संगीतमयम् वातावरणं जनयन्तिस्म। यदि कश्चित् कदाचित् बाह्यात् आक्रमणम् कुर्यात् तस्य कृते कवच-साधनानि अपि आसन्।

सीता-लक्ष्मणाभ्याम् सह रामः, प्रसन्नः सुग्रीवः भक्तः हनुमान् , विभीषणादयः सर्वे तम् पुष्पकम् आरोहितवन्तः। घनघोर गर्जनं कृत्वा विमानः आकाशं प्रति अगच्छत्। विमानेन यात्रां कुर्वन् रामः सीताम् अनेकानि स्थानानि दृश्याणि प्रादर्शयत्। नल-नील-निर्मितम् सेतुम् अपि प्रदर्शितवान्।

किंचित् समयानन्तरम् पुष्पकः किष्कन्धाम् प्राप्तः। सीतायाः इच्छया विमानः नीचैः अवातरत्। सुग्रीवादिभिः वानरैः समानीताः स्वभार्याः। किष्किंघातः ऋष्यमूक पर्वतम् उल्लंध्य पंचवटीम् ततः चित्रकूटम् संप्राप्ताः। ततः च किंचित् समयानन्तरम् अयोध्याम् समीपस्थां प्राप्य हर्षितः रामः सीताम् अकथयत् - सीते, वयम् अधुना अयोध्याम् संप्राप्ताः, क्षणादेव तत्र.....।

अद्य चतुर्दशमवर्षस्य अंतिमः दिवसः आसीत्। प्रयागे भरद्वाजस्य आश्रमं प्राप्य विमानः अवातरत्। श्रीरामः भक्तश्रेष्ठं हनुमन्तम् अयोध्याम् प्रति प्रेषितवाम् येन भरतः श्रीरामस्य प्रातरेव प्रतीक्षाम् कुर्यात्। ऋषिः भरद्वाजः श्रीरामम् भरतस्य नंदिग्राम-निवास विषये सर्वम् अवर्णयत् तथा चित्रितवान् भरतस्य मृग चर्मधारणम् , भूमौ शयनम् च। हनुमान् नन्दिग्रामम् प्राप्य तत्र अपश्यत् यत् श्रीरामस्य पादुके सिंहासने आस्ताम्। जटाधारी भरतः मुनिवत् काषायवस्त्राणि धारयन् आसीत्। श्रीरामस्य शुभागमन-सूचनां श्रुत्वा हृदयेन प्रफुल्लितः भरतः सुविपुलेन भुजद्वयेन प्रियम् हनुमन्तम् आलिंगितवान्। शुभसूचनायाः प्रसाद रूपेण लक्ष-संख्यकाः गावः, शत संख्यकाः ग्रामाः च तस्मै समर्पिताः। श्रीराम-शुभागमन-सूचनया सर्वे अयोध्यावासिनः हर्षिताः उल्लसिताः सर्वाम् अयोध्याम् सुसज्जिताम् शोभामयीम् कृतवन्तः। मार्गम् उभयतः पताकाः स्थाने स्थाने वन्दनवारावृतानि द्वाराणि विनिर्मितानि। विविधैः रंगैः चित्रिताः चतुष्पथाः। नंदिग्रामतः अयोध्या पर्यन्तम् स्वागताय नराणाम् नारीणाम्, आबालवृद्धानाम् सम्मर्दः मार्गम् उभयतः अतिष्ठन्। विविधानि गीतमयानि मधुराणि वाद्यानि गुंजायमानानि आसन्।

सर्वे जनाः स्थाने स्थाने एकत्रिताः आकाशं पश्यन्तः श्रीरामं प्रतीक्षमाणाः आसन्। क्षणम् यावत् श्रीहनुमान् अवदत् - पश्य, सः चन्द्र-सम-सुन्दरः दिव्यः श्रीराम-विमानः आगच्छति। क्षणानन्तरम् विमानः मन्दम् मन्दम् नीचैः अवातरत्। सर्वैः मिलित्वा घोषितम् - श्रीरामः आगतः इति। श्रीराम-सीता-लक्ष्मणानाम् जयकारेण गुंजितम् जगत्। श्रीरामः विमानात् नीचैः अवातरत्। भरतः शिरसिस्थिते पादुके भूमो निधाय दंडवत् प्रणामम् कृतवान् भक्तत्सलः रामः गाढालिंगनेन भ्रातरम् भरतम् कृतार्थम् कृतवान्।

अहा, कीदृशम् मिलनम् आसीत् श्रीरामस्य भरतेन सह ! तस्मिन् दिने सर्वत्र प्रफुल्लितः जन-समुदायः। सर्वेषाम् मनसि प्रसन्नतायाः समुद्रः

तरंगायितः आसीत्। वर्ष सहस्त्राणि व्यतीतानि। अद्यापि श्रीराम-भरतयोः मिलन-प्रसंगः हृदये हर्षम् उत्पादयति उत्सादयति च मनसि भ्रातृभावम्।

स्वर्णकारस्य कूपः

एकः साधुः अरण्ये गच्छन् आसीत्। निरन्तरं चलन् सः पिपासितः एकम् कूपम् अपश्यत्। कूपस्य पार्श्वे एव जलपात्रम् रज्जुः च आस्ताम्। साधुः रज्जु-जलपात्रयोः सहायतया कूपात् जलम् आदाय अपिबत्। जलम् पीत्वा सः कूपम् अभ्यन्तरम् अपश्यत्। सुन्दरः स्वच्छः च कूपः आसीत्। निकटे एवं छायाप्रदः वृक्षः आसीत्। तदैव साधुः मनसि अचितयत् यत् अत्र कश्चित् न अस्ति, जलपात्रेजलम् पूरयित्वा पात्रम् आदाय गन्तव्यम् , यदि मार्गे पिपासा भविष्यति तदा अनेन तृप्ता भविष्यति। एतत् विचार्य सः जलेन पात्रम् अपूरयत्। यावत् एव सः रज्जुम् त्यक्त्वा चलितुम् आरब्धः तावत् एवं कूपस्य अभ्यन्तरात् एका वाणी गुंजिता - "धिक् धिक् किं करोषि त्वम् ? त्वम् चौरकर्म करोषि" साधुः आत्मानम् धिक्कृतम् मत्वा रज्जुम् जलपात्रं च तत्रैव विहाय ततः प्राचलत्। चलित्वा तस्य स्थानस्य राज्ञः राज-समायाम् राजानम् अपृच्छत् महाराज, अस्मिन् अरण्ये निर्मितः कूपः कस्य धनेन रचितः?

राजा वृत्तान्तं ज्ञातुम् प्रायतत। ततः सः ज्ञातवान् यत् अयम् कूपः कस्यंचित् वंचक-स्वर्णकारस्य धनेन निर्मितः अस्ति। इदं रहस्यं ज्ञात्वा साधुः प्रावदत् - वंचितानाम् ग्राहकाणाम् धनेन निर्मितस्य कूपस्य जलम् पीत्वा एव मम मनसि चौरकर्मणि प्रवृत्तिः जाता।

यः यादृशम् अन्नम् खादति, जलम् पिवति तस्य तादृशी प्रवृत्तिः भवति।

दासी राजकुमारी

असुरेन्द्रस्य वृषपर्वणः पुत्री शर्मिष्ठा आसीत्। एकदा सा सखीभिः सह विहारार्थम् वनम् अगच्छत्। शुक्राचार्यस्य पुत्री देवयानी अपि तया सह तत्र गता। हसन्त्यः किल्लोलं कुर्वन्त्यः ताः सरोवर-तटम् अगच्छन्। मनः कृत्वा ताः जले अकूर्दन्। तत्र ताः जलक्रीडाम् अकुर्वन्। तदैव प्रचंडः वायुवेगः समागच्छत्। तेने वायुवेगेन तासां वस्त्राणि अव्यवस्थितानि। जलात् निष्क्रम्य शीघ्रम् "कस्याः किम् वस्त्रम् - इदम् अविचार्य यद् वस्त्रम् प्राप्तम् तत् नीत्वा निज शरीराणि आच्छादितानि। अज्ञानतया शर्मिष्ठा देवयान्याः परिधानम् गृहीतवती। देवयानी सखी सुलभ-वृत्तिना अकथयत् - अयि असुर-पुत्रि, शिष्यस्य पुत्री अज्ञानतया गुरुपुत्र्याः वस्त्रम् धारयति।

राजकुमारी शर्मिष्ठा व्यंगोक्तिम् सोढुम् असमर्था अवदत् - री विप्रपुत्रि, त्वम्

साभिमाना कथम्, किं न जानासि यत् अहम् तस्यराज्ञः पुत्री, यं महाराजं सर्वे शिरसा नमन्ति, तस्य गुणान् गायन्ति, तथा त्वम् तस्य दीन-विप्रस्य पुत्री असि यः मम पित्रा प्रदत्तम् भुंक्ते। उच्चकुलस्य प्रशंसां कुर्वन्तीम् त्वाम् तव कुलम् च धिक् !

देवयानी गुरु-नन्दिनी आसीत् साअपि तत् कटु-वाक्यम् सोढुम् असमर्था वाक्-कलहम् कृतवती। शर्मिष्ठा देवयानीं करप्रहारेण् कूपे पातयन्ती अन्याभिः सखीभिः सह राजभवनम् प्रत्यागच्छत्। कूपे जलम् न आसीत् देवयानी सहायतायै प्रार्थयत्। सहायतायै प्रार्थना-वचनं श्रुत्वा भरतवंशस्य राजा ययातिः तत्र आगच्छत् तथा ताम् कूपात् बहिः अकरोत्। राजा तत्र आखेटनाय आगतः आसीत्। क्रुद्धा देवयानी गृहम् न आगच्छत्। देवयानीं बिना पिता, अदेवर्षिः शुक्राचार्यः अत्यन्तम् चिन्तितः अभवत्। सः पुत्रीम् अन्विष्यमाणः अरण्यम् प्रति प्राचलत्। तत्र वनस्था देवयानी सर्वम् वृत्तान्तम् पितरम् अश्रावयत्। शुक्राचार्यः विविधाभिः युक्तिभिः प्राबोधयत् परन्तु देवयानीम् अक्रुद्धाम् कुर्त्तुम् असमर्थः आचार्यः प्रतिश्रुतवान् यत् देववानी वृषपर्वणः राज्ये प्रवेशम् न करिष्यति।

राजा वृषपर्वा सर्ववृत्तैः परिचितः आचार्यम् शुक्राचार्यम् पुनः पुनः प्रार्थयन् अपि शुक्राचार्येण विज्ञापितः यत् देवयानी एवं क्षन्तुम् समर्था, सा स्वीकृतिम् दास्यति। वृर्षपर्वा समस्त-परिवारेण सह देवयानीं प्रति गतवान् तथा क्षमाम् अयाचत। देवयानी क्षमां कुर्वती राजानम् वचनेन प्रतिज्ञाबद्धम् अकरोत्। सा प्रत्याज्ञापयत् यत् तवपुत्री शर्मिष्ठा मम दासी भविष्यति। विवाहितायाम् मयि सा दासीरुपेण मयासह वत्स्यति"।

शर्मिष्ठा प्रतिज्ञाम् पूरयितुम् प्रतिबद्धा आसीत्। सा दासीत्वम् स्वीकृतवती।


एतेन सिद्धम् यत् परिहासः तु श्रेष्ठः परन्तु उपहासः जीवनम् नाशयति।

सुखमयम् जीवनम् कर्त्तुम् मितभाषी भवेत् नरः । यत् वदेत् प्रियम् मधुरम् च वदेत् । समयम् सम्यक् आलोच्य वक्तव्यम् ।

उड्डीयमानः वृक्षः

एकः काष्ठकारः आसीत्। सः प्रतिदिनम् काष्ठकर्म करोति स्म। येन केन प्रकारेण सः परिवार-पोषणम् कुर्वन् आसीत्। एकस्मिन् दिने काष्ठच्छेदनेन परिश्रान्तः वृक्षच्छायाम् उपाश्रित्य सुप्तः रात्रिम् व्यतीत्य प्रातः जागृतिम् लभमानः अपश्यत् यत् तत्र वृक्ष एव न स्थितः आसीत्। आलस्येन निबद्धः सः नेत्रे निमील्य पुनः निद्रामग्नः अभवत्। स्वप्ने सः अपश्यत् यत् उड्डीयमानः वृक्षः आकाशात् अधः अवतरति। क्षणानन्तरम् एषागतिः - न ययौ त तस्थे। आश्चर्यचकितः सः काष्ठिकः बारं बारं आत्मानाम् कथयति किं नेत्राभ्याम् दृष्ट्वा अपि असत्यम् भवति। एवं चिन्तयन् सः तस्मिन् वृक्षे एकम् वस्तु-स्थानम् निर्मितवान्। संध्या समये सः तत्र स्वयम् अतिष्ठत् एवम् कृते कपाटौ आवृतौ कृतवान्। न कोऽपि जानाति यत् तत्र कश्चित् निभृतः अस्ति।

रात्रौ द्वौ युवकौ तत्र आगच्छताम्। झटिति तौ वृक्षस्य शाखाम् उपाविशताम्। तयोः एकः अवदत् - हे पितामह वृक्ष, मानसरोवरम् प्रति



उड्डयनं कुरु"। वृक्षः प्रथमम् किंचित् अकम्पत तथा आकाशम् प्रति उड्डीय दूरम् अगच्छत्। मार्गे द्वितीयः अकथयत् - अद्य वृक्षः मन्दम् मन्दम् उड्डयनं कथम् करोति ? प्रथमः प्रत्युदतरत् - व्यर्थम् एव संशयः नैव कर्त्तव्यः। दशाधिक-पक्षिणाम् भारेण किम् भवति ? किंचित् क्षणानन्तरम् सः वृक्षः एकस्यसरोवरस्य तटे अवातरत्। तस्मिन् निर्मले सरोवरे हंसः तरन् आसीत्। सः युवकौ दृष्ट्वा तटम् आगच्छत्। यावत् एव युवकौ तम् हंसम् अस्पृशताम् तावत् तत्र सुन्दरी राजकुमारी प्रादुर्भूता। युवकौ मुक्ताफलानि आदातुम् ताम् आदिष्टवन्तौ। राजकुमारी ताभ्याम् द्वाभ्याम् मुक्ताफलानि प्रदत्तवती। मुक्ताफलानि पाटलानि इव आसन्। तेषां प्रभा परितः परिसृता। काष्ठिकः वृक्षात् अवतीर्य निभृतः भूत्वा सर्वम् पश्यन् आसीत्। तदैव तौ युवकौ वृक्षम् अधिरुह्य उड्डीय च गतवन्तौ। वराकः काष्ठिकः तत्रैव निभृतः अतिष्ठत्। राजकुमरी च पुनः हंसरूपम् गृहीत्वा सरोवरे तरन्ती आसीत्। काष्ठिकः तस्मिन् तटे स्थितः अचिन्तयत् परन्तु किंकर्त्तव्यविमूढः आसीत्। प्रातः काले हंसः अपि उड्डीय गन्तुम् आरब्धवान् काष्ठिकः तम् अन्वगच्छत्। सः अपश्यत् यत् सः हंसः एकम् राजभवनम् प्राविशत्। होरैकानन्तरम् सः हंसः चंचौ कौशेयवस्त्रम् आनयत्। तदैव प्रत्यावर्त्तनाय उद्यतम् काष्ठिकम् तत्र एकत्रिताः परीरूपिण्यः कन्याः अपृच्छन् किं सः हंसः तव वर्त्तते यः परी राज्ञयः मौक्तिकान् चोरयति ? काष्ठिकः सर्वम् वृत्तान्तम् ताभ्यः न्यवेदयत्। तदा ताभिः परिज्ञातम् यत् इमौ युवकौ कामरुपस्य ऐन्द्रजालिकौ स्तः। इमौ मौक्तिकानाम् भंडारम् अपहर्त्तुम् इच्छतः।

अन्यस्यां रात्रौ परीभिः परितः आक्रान्तः सः सरोवरः। यावत् सः वृक्षः द्वौ युवकौ नीत्वा तत्र आगच्छत् तथा हंसरूपाम् राजकुमारीम् मुक्ताफलानि अयाचत तावत् एवं एका परीकन्या कमलनालेन तौ बद्धौ अकरोत्। सा काष्ठिकाय उपहारम् प्रदाय राजकुमारीम् आज्ञापयत् सा काष्ठिकेन सह

विवाहं कुर्यात्। तमेव वृक्षम् आरुह्य सः काष्ठिकः विवाहितया राजकुमार्या सह प्रत्यागच्छत्। परीभिः प्रदत्तान् उपहारान् गृहीत्वा स्वमात्रा पत्न्या च सह सुखेन जीवन-यापनम् अकरोत्।

गोपालस्य बुद्धि चातुर्यम्

अस्माकम् देशे चत्वारः चतुराः प्रसिद्धाः सन्ति। वीरबलः, मुल्लादोप्याजा, गोपाल भांडः, तेनालीरामः च बुद्धि चातुर्ये चर्चिताः संति। गोपालः बंगदेशस्य नदिया ग्रामस्य निवासी आसीत्। निर्धनतया सः शिक्षां न अलभत। परन्तु बुद्धिचातुर्येण सः पंडितान् हतप्रभान् अकरोत्। बुद्धेः चातुर्येण एव सः राज्ञः कृष्णचन्द्रस्य राज्यसमायाम् सम्मानितः आसीत्। अनेनैव सः राज्ञे स्पृहणीयः प्रियः च अभवत्।

एकस्मिन् दिने राज्ञः सभायाम् एकः पंडितः समागतः। भाषासमूहज्ञाता पंडितः सर्वान् आश्चर्यचकितान् अकरोत्। न कोऽपि तस्य मातृभाषां ज्ञातुम् समर्थः। ततः गोपालः स्वतंत्ररूपेण राज्ञा आज्ञप्तः तस्य पंडितस्य मातृ भाषायाः ज्ञानम् कर्तुम्।

समाप्तायाम् सभायाम् सर्वे राजसभा - सदस्याः सोपानात् नीचैः आगच्छन्तः आसन् तदैव गोपालः तम् पंडितम् हस्त-प्रयोगेण अधः अपातयत्।

अधः पतिते तस्मिन् पंडिते सः मातृभाषायाम् दुर्वाक्यम् अवदत्। अतेन प्रयोगेण राजसभा-सदस्याः चकिताः अभवन्। गोपालः प्रत्यवोचत् - प्रशिक्षितः शुकः 'राम राम' इति वदति परन्तु यदा बिडालः आगच्छति तदा राम शब्दं विस्मृत्य मातृभाषायाम् एवं विलपति। इदमेव मातृभाषायाः सौन्दर्यम्।

अद्य स्वतंत्र भारते वयम् मातृभाषायाः महत्वम् न स्वीकुर्मः। माता तथा मातृभाषा जन्मना एव संपृक्ते भवतः।

क्षमा संतस्य भूषणाम्

संतः विठोवा नगरात् बहिः कुटीम् निर्माय वसति स्म। एकस्मिन् दिनै एकः दर्शनार्थी नागरिकः मध्यान्ह- भोजनाय संतम् प्रार्थयत्। संतः यदा तस्य गृहम् अगच्छत् तदा तत्र नागरिकः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा भोजनम् विना प्रत्यागच्छत्।

समयानन्तरम् सः एव नागरिकः पुनः तम् संतम् भोजनाय निमंत्रितवान्। संतः निमंत्रणम् स्वीकृत्य तथाकालम् तस्य गृहम् गतवान् परन्तु तत्र नागरिकः गृहे कलहम् कुर्वन् आसीत्। सः संसूचितः अपि बहिः न आगतः तथा संतः बुभुक्षितः एव कुटीम् प्रत्यावर्त्तत। सप्तांहानन्तरम् सः नागरिकः पुनः संतम् भोजनाय प्रार्थितवान्। संतः सहजतया स्वीकृतवान्। एतत् दृष्ट्वा सः

नागरिकः संतस्य चरणयोः अपतत्। सः अवदत्-महात्मन् , मया द्विबारम् अपराधः कृतः परन्तु भवता किमपि न उक्तम्, मम निमंत्रणम् स्वीकृतम् च मह्यम् न क्रुद्धम्। अहम् सापराधः दंडनीयः"। संतः विठोवा प्रत्युदतरत् - क्रोधेन शुद्धिः न भवति। त्वया अपराधः स्वीकृतः इत्येव पर्याप्तम् मम भ्रातः।

नागरिकः अवदत् -- महात्मन्, अनुशासनहीनाय क्रोधस्य उपयोगिता अस्त्येव। संतः प्रत्युवाच-अक्रोधेन, शान्तिना क्षमया च विजयम् लभते नरः। मयि क्रोधिते पश्चात्तापः न भवेत्।

अद्य अस्माकम् समाजे क्रोधस्य अधिकता, क्षमायाः अभावः।

नहि वैरेण वैराणि
शाम्यन्तीह कदाचन।

अंधः भक्तः

एकस्मिन् प्रोन्नते पर्वते एकः देवालयः स्थितः आसीत्। सुदूरात् भक्तजनाः तत्र दर्शनार्थम् आयान्ति स्म। एकदा भक्ताः दर्शनाय गच्छन्तः आसन्। मंदिर मार्गः कठिनः संकीर्णः च आसीत्। अकस्मात् वर्षा अभवत्। सर्वे भक्ताः शैलच्छायायाम् आश्रयम् प्राप्तवन्तः। तदैव ते एकम् अन्धम् भक्तम् बालकम् अनुगच्छन्तम् अपश्यन्। ते तम् अंधभक्तम् अकथयन् - भोः



अग्रे न गच्छ, अधः पतिष्यसि"। इति श्रुत्वा सः बालकेन सह तत्र भक्तानाम् निकटे एवं समागच्छत्। तम् अंधं ज्ञात्वा एकः भक्तः अपृच्छत्-अरे वृद्ध, भवान् कुत्र गच्छति ? वृद्धः प्रत्यवदत् - भगवतः दर्शनाय मंदिरम् गन्तुम् इच्छामिं"। अन्ये दर्शनार्थिनः तम् उपहसन्तः अकथयन् - नेत्राभ्याम् विना दर्शनम् कुतः ?

एतत् श्रुत्वा अंधः अवदत् - भ्रातरः, भगवान् माम् यादृशं निर्मितवान् अहम् तादृशः। अहम् भगवतः मूर्तिम् द्रुष्टुम् असमर्थः परन्तु भगवान् मां द्रक्ष्यति अवश्यम् अतः गच्छामि।

इदं श्रुत्वा उपहासं कर्त्तारः लज्जिताः तम् अंधम् भक्तम् श्रद्धया पश्यन्तः आसन्। भगवान् प्रसन्नः संजातः अंधभक्तस्य वृद्धस्य श्रद्धया। भगवान् तस्मै दिव्य दृष्टिम् अयच्छंत् संभवतः।

वस्तुतः श्रद्धा भावस्य कारणम्।

श्रद्धया सर्वम् लभ्यते।

संगतेः परिणामः

वन्दनः नाम एकः ऋषिः आसीत्। सः कस्यचित् राज्ञः राजभवनात् यज्ञम् कारयित्वा प्रभूतां दान-दक्षिणाम् नीत्वा आश्रमम् प्रत्यागच्छन् आसीत्। मार्गे रात्रिः अभवत्। अरण्ये हिंसक पशूनाम् भयात् चौराणाम् भयात् च कुत्रचित् विश्रामस्थानस्य अन्वेषणम् कृतवान्। विश्रामाय सः एकस्य राक्षसस्य दुर्गम् अलभत। राक्षसम् ज्ञात्वा अपि सः ऋषिः विश्रामाय तम् अपृच्छत्। राक्षसः स्वीकृतवान् परन्तु यदा रात्रौ ऋषिः सुप्तः तदा सः दैत्यराजः ऋषेः पार्श्वे स्वर्णमुद्राः अपश्यत्।

प्रातः ऋषिः यदा गन्तुम् आरब्धः तदा धनलोभी राक्षसराजः तम् ऋषिम् विश्रामाय प्रार्थयत् राक्षस-दुर्गे सुखम् अनुभवन् ऋषिः निवासस्य औचित्यम् व्यस्मरत्।

संध्या काले यदा ऋषिः स्नानाय कूपम् अगच्छत् तथा यावत् जलाकर्षणाय कूप-समीपे गतः तावदेव राक्षसः ऋषिम् पृष्ठतः हस्त प्रयोगेन कूपे अपातयत्। कूपे पतितः ऋषिः प्राणान् अत्यजत्।

एषः कुसंगतेः परिणामः। यादृशी संगतिः तादृशः परिणामः। सदा सत्संगतिः कर्त्तव्या।

धनवृक्षः

त्रिविष्टपस्य पर्वतीये ग्रामे एका वृद्धा न्यवसत्। तस्याः त्रयः अपि पुत्राः अलसाः, श्रमहीनाः च आसन्। वृद्धायाः प्रांगणे एकः धनवृक्षः आसीत्। अस्मात् वृक्षात् प्रतिदिनम् पंचाशत् रूप्यकाणि प्राप्तानि आसन्। तानि त्रोटयित्वा तथा शुष्कानि कर्त्तव्यानि आसन् तदनन्तरम् तानि पीतानि कठोराणि च भवन्ति स्म। प्रत्येकस्मिन् रूप्यकें पंचछिद्रच्छेदनम् भवति स्म। पंचछिद्रान्वितेन रूप्यकेण किमपि क्रेतव्यम् आसीत्। यथा अधुना धनपत्राणि सन्ति तस्मिन् काले तथा नासीत्। तेषां रूप्यकाणाम् पणद्वयम् मूल्यम् आसीत्।

धनवृक्षम् लब्ध्वा अपि वृद्धा धनहीना आसीत्। तस्याः पुत्राः वृक्ष-फलानाम् त्रोटने शुष्कीकरणे अपि मातुः सहायताम् न कुर्वन्तिस्म। एकस्मिन् दिने एकः पुत्रः निकटस्थ-ग्रामात् एकाम् कन्याम् आनयत्। सः कन्याम् आज्ञाययत् यत् सा वृद्धाम् सेवेत गृहकार्यम् च कुर्यात्। कालानन्तरम् सा विवाहिता भविष्यति। प्रातः उत्थाय सा कन्या गृहकार्यम् आरभते स्म। जलघट प्रपूरणम् , स्वच्छता, भोजन-रचना आदीनि सर्वाणि कार्याणि सा करोति स्म। अरण्यात् काष्ठानि आनयति स्म। सर्वम् दिनम् कठोर श्रमेण यापयति स्म। वृद्धा अपि ताम् भर्त्सयति दंडयति च। सा अत्यन्तम् दुःखिता



जाता।

एकदा संध्यायाम् सा कन्या किमपि अशुद्धम् कार्यम् अकरोत्। तेन अकार्य कारणात् वृद्धा दुर्वचनम् कथयित्वा ताम् ताडयितुम् अधावत्। कन्या भयात् पर्वतम् आरोहत् परन्तु वृद्धा आरोढुम् असमर्था आसीत् सा कन्या भयभीता पुनः गृहम् न प्रत्यावर्त्तत। सा अरण्ये एव बुभुक्षिता अभ्राम्यत्।

एकस्मिन् दिने सा अन्वभवत् यत् तस्याः द्वौ श्वेतौ पक्षौ उत्पन्नौ। दिनानन्तरम् सा उड्डयनम् कर्त्तुम् आरब्धवती। वृक्षात् वृक्षे उड्डीय सा पक्षिणाम् गानम् श्रृणोति, बुभुक्षा पिपासा वा तां न बाधते।

एकदा एकः लामा उड्डीयमानाम् परीकन्याम् अपश्यत्। चकितः सः विविधानि भोजनानि निर्माय वृक्षस्य समीपे अस्थापयत्। सा परीकन्या तत्र आगत्य मानव-निर्मितम् भोजनं भोक्तुम् प्रारभत।

कानिचित् दिनानि व्यतीतानि। एकस्मिन् दिवसे सः लामा ताम् परीकन्याम् धृतवान्। यावत् सा तत् भोजनम् अकरोत् तावदेव तस्याः पक्षौ विलुप्तौ। लामा ताम् अपृच्छत् तथा सा अपि सर्वम् वृत्तम् अकथयत्।

तदा लामा वृद्धायाः पार्श्वे गत्वा ताम् अबोधयत् यत् सा कन्यायै यातनाम् पीडाम् च न यच्छेत्। अनेन कुकर्मणा मनुष्यः शान्तिम् न लभते" । इदं श्रुत्वा सा वृद्धा वधूगमनेन दुःखिता तस्य भिक्षुकस्य चरणयोः अपतत्। तया प्रतिज्ञातम् यत् भविष्ये सा एतत् दुष्कर्म न आचरिष्यति।

लामा ततः प्रत्यावर्त्य कन्याम् वृद्धायाः पार्श्वे आनयत्। सा स्वपुत्रेण सह तस्याः विवाहम् अकरोत्। अधुना वृद्धा सरल-प्रकृतिः एवं वधूप्रिया अभवत्।

कदाचिदपि कस्यचित् चित्तम् न संतापयेत्। नारी सदा सर्वत्र पूज्या भवति।

राज्य-त्यागः

कुरुदेशस्य राज्ञः ऋषिषेणस्य द्वौ पुत्रौ आस्ताम् देवापि शन्तनुः च। दिवंगते राज्ञि सर्वे मंत्रिणः ज्येष्ठम् पुत्रं 'देवापि' नामकम् राज्यसिंहासनम् अधिरोढुम् प्रार्थयत् परन्तु देवापि अकथयत्-अहम् कुष्ठरोगग्रस्तः अतः राज्ययोग्यः नास्मि, मम लघुभ्राता शन्तनुः राजा कर्तव्यः।

देवापि-विचारं श्रुत्वा सर्वाः प्रजाः प्रसन्नाः शन्तनुम् राजानम् अकुर्वन्। राजतिलकानन्तरम् देवापि तपसे वनम् अगच्छत्।

एकदा राज्ये वर्षा न अभवत्। जनसमुदायः अकालग्रस्तः अत्यन्तम् संत्रस्तः। महाराजः शन्तनुः राज्यसभायाः सदस्यैः प्रजाजनैः च सह वनं गत्वा देवापि मुनिम् प्रणम्य प्रार्थयत् - महामुने, ज्येष्ठ भ्रातरि उपस्थिते लघु भ्रातारम् राजानम् कृत्वा प्रजाजनैः संभवतः, अपराधः कृतः। अतएव राज्ये वर्षायाः अभावः। कृपया राजभवनम् आगत्य सिंहासनासीनो भवतु"। इदं कथयित्वा शन्तनुः नतमस्तकः राजदंडम् छत्रं च ज्येष्ठ भ्रात्रे समर्पितवान्। देवापि मुनिः तत्सर्वम् पुनः लघुभ्रात्रे अयच्छत् अवदत् च - भ्रातः, अहम् राज्ययोग्यः नास्मि। संकट-निवारणाय यज्ञस्य आयोजनम् कर्त्तव्यम्। अहम् पौरोहित्यं कर्म करिष्यामि।

महाराजः शन्तनुः राजधानीम् आगत्य यजन-प्रबन्धं चकार। शुभतिथौ यज्ञारंभः संजातः। देवापि पुरोहितः अभवत्। यज्ञे पूर्णे वर्षा अभवत् द्वयोः अपि राजकुमारयोः प्रशंसा अभवत्।

त्यागेन मनुष्यः महान् भवति। रामेण अपि राज्यलोभः न कृतः। राम-भरतयोः प्रसंगः राज्यत्यागेन एव प्रशस्यः।

ऋग्वेदे एषा कथा उल्लिखिता अस्ति।

राज्ञाम् राजा

अकबर - वीरबलयोः कथा प्रसंगः बहुचर्चितः। सम्राजः अकबरस्य राजसभायाम् अनेके गुणिनः, पंडिताः, कलाकाराः च आसन्। तेषु प्रसिद्धः गायकः तानसेनः अपि आसीत्। समयानुसारम् महाराजः अकबरः तानसेनस्म संगीतेन आनंदं लभतेस्म। एकस्मिन् दिने सम्राट् अकबरः तानसेनम् अकथयत् - तानसेन, त्वम् संसारे सर्वश्रेष्ठः गायकः न अन्यतरः कश्चित् संगीते।

तानसेनः प्रत्यवदत् - महाराज, क्षमस्व, न एतत् सत्यम् , एकः महान् गायकः मत्तः कुशलतरः यस्य सम्मुखे मम गायनम् किंचित् अपि नास्ति। सम्राट् अपृच्छत् - कः कुत्र च असौ महान् गायकः निवसति ? तानसेनः

अकथयत् - सम्राट् , सः मम गुरुः हरिदासः यः वृन्दावने निवसति। अकबरः - तानसेन, वयम् तस्य गायनं श्रोतुम् इच्छामः। तम् गायकम् अस्माकम् राजसभायाम् आनय। तानसेनः नम्रतया अकथयत् - महाराज, सः राजसभायाम् न आगमिष्यति। सम्राट् अकबरः आश्चर्येण अकथयत् - सः कथम् न आगमिष्यति ? वयम् तस्मै यथेच्छम् धनम् उपहारं च दास्यामः। तानसेनः निर्भयम् प्रत्युदतरत् - श्रीमन्, सः महान् कलाकारः बंधनम् न स्वीकरोति, सः राज्ञाम् राज्ञः स्तुतौ गायनम् करोति।

इदं श्रुत्वा सम्राट् अकबरः तस्मै न अक्रुध्यत् अपितु अकथयत् - सत्यम् , वयम् स्वयम् एव तव गुरोः गायनं श्रोतुम् वृन्दावनम्-गमिष्यामः।

सम्राट् तत्र अगच्छत्। तानसेनस्य गुरोः स्वामिनः हरिदासस्य गायनं श्रुत्वा अत्यन्तम् सन्तुष्टः प्रसन्नतां च अलभत।

कलाकारः स्वाधीनः मनुष्यः तथा देशः च सम्मानम् लभते। स्वतंत्रतायै लोकाः प्राणान् समर्पितवन्तः।